ल्पतन्त्रम् । दूषयन् दूषणीयः दूषितः दूषयित्वा संदूष्य । उपसर्गपूर्वकः तत्तदुपसर्गद्योत्यार्थयुक्तविकारे

**दुष्कर** त्रि० दुःखेन क्रियते दुर्+कृ–कर्मणि खल् । कर्त्तु-मशक्ये १दुःखेन करणीये "अपि यत् सुकरं कर्म तद-प्येकेन दुष्करम्" मनुः "मुग्धे ! दुष्करमेतदित्यतितरां शक्ता सहाय बलात्" अमरुश०। २आकाशे न० शब्दार्थ-कल्पतरुः तस्याजन्यत्वेन दुष्करत्वात् । भावे खल् । ३दुः-खेन करणे न० ।

**दुष्कर्मन्** न० दुष्टं कर्म प्रा०स०। १पापे । दुष्कर्मभिश्च नहुषो नाशं यास्यति दुर्मतिः" भा०उ० १२अ० "दुष्कर्मजा नृणां रोगा यान्ति चैव क्रमात् शमम् । जपैः सुरार्चनैर्होमै-र्दानैस्तेषां शमो भवेत्" शातातपः । दुःस्थितं कर्मास्य प्रा०ब०। २पापकर्मकारके त्रि० "ततो वसति दुष्कर्मा नरके शाश्वतीः समाः" भा०उ०१२१अ० ।

**दुष्काल** पु० दुष्टः कालः प्रा०स० । निन्दिते काले । यस्य यः कालोविहितस्तस्य ततो वैलक्षण्ये कालस्य दुष्टता २प्रलये च । दुःखहो कालः कलनमस्य प्रा०ब० । ३शिवे "अकालश्चातिकालश्च दुष्कालः कालएव च" भा०शा० २८६ अ०शिवनामोक्तौ ।

**दुष्कुल** न० दुष्टं कुलम् प्रा०स०। १निन्दिते कुले "अन्त्यादपि परं धर्मं स्त्रीरत्नं दुष्कुलादपि" मनुः । दुःस्थं कुलमस्य प्रा०ब० । २निन्दितकुलजाते त्रि० "मदमूर्खताभिमाना दुष्कुलमैश्वर्यसंयुक्ताः" प्रा०द० दुष्कुले भवः पक्षे ख । दुष्कुलीन, ढक् दौष्कुलेय निन्द्यकुलभवे त्रि०

**दुष्कृत** न० दुष्टं कृतम् प्रा०स० । १पापे "दातुर्यत् दुष्कृतं किञ्चित् तत्सर्वं प्रतिपद्यते । निपानकर्त्तुः स्नात्वा तु दुष्-कृतांशेन लिप्यते" मनुः २तज्जनके कर्मणि च "यथा यथा मनस्तस्य दुष्कृतं कर्म गर्हति" मनुः तदस्यास्ति इनि । दुष्कृतिन् तद्युक्ते "पुनःपुनर्दुष्कृतिनं निनिन्द" रघुः ।

**दुष्कृति** त्रि०दुष्टा कृतिरस्य प्रा०ब०। दुष्कर्मकारके "पादस्-र्थस्तु रक्षांसि दुष्कृतीनवधूननम्" मनुः प्रा०स०। २पापे स्त्री

**दुष्क्रीत** त्रि० दुष्टं क्रीतम् प्रा०स० । रूपसंख्यादिकमपरीक्ष्य क्रीते क्रीतानुशयशब्दे दृश्यम् "क्रीत्वा मूल्येन यो द्रव्यं दुष्क्रीतं मन्यते क्रयी" नारदः । [अमरः ।

**दुष्खदिर** पु०दुष्टः खदिरः प्रा०स०। कालस्कन्दे क्षुद्रखदिरभेदे

**दुष्ट** त्रि० दुष–क्त । १दुर्बले २अधमे विश्वः । ३दोषाश्रिते च दोषशब्दे वक्ष्यमाणव्यभिचारादीनामन्यतमयुक्ते ४हेतौ । ५पित्तादिदोषयुक्ते स्नानकारणे नेत्रादौ यथा कथञ्चित् ६दोषयुक्ते च त्रि० ७कुष्ठे न० (कुड़) ख्याते शब्दच०। "त्याज्यो दुष्टः प्रियोऽप्यासीत्" रघुः "दुष्टः शब्दः स्वरतो वर्णतो वा" महाभाष्यधृता श्रुतिः ।

**दुष्टचारिन्** त्रि० दुष्टं चरति चर–णिनि । दोषयुक्तकर्म-कारिणि "अथ यत्नमासीनं शङ्करं दुष्टचारिणः" भा०वि०४अ० ।

**दुष्टगज** पु० नित्यकर्म० । गम्भीरवेदिनि गजे हेमच० ।

**दुष्टनु** त्रि० दुष्टा तनुरस्य प्रा०ब० वेदे षत्वम् । दुष्टदेह-युक्ते "सुधा किल त्वा दुष्टनो ! जघ्निवानुत्ते न द्रुहः" अथ० ४।७।२ लोके तु दुस्तनु इत्येव तत्रार्थे

**दुष्टयोग** पु० कर्म०। १वैधृतिव्यतीपातादि योगे तत्र स्नानदा-नाद्यतिरिक्तकर्मसु वर्ज्यत्वमशुभसूचकत्वञ्च सू०सि०नाना-स्थाने उक्तं यथा

"तुल्यांशुजालसम्पर्कात् तयोस्तु प्रवहाहतः । तद्-दृक्क्रोधभवो वह्निर्लोकाभावाय जायते । विनाश-यति पातोऽस्मिन् लोकानामसकृद् यतः । व्यतीपातः प्र-सिद्धोऽयं संज्ञाभेदेन वैधृतिः । स कृष्णो दारुणवपु-र्लोहिताक्षो महोदरः । सर्वानिष्टकरो रौद्रो भूयो भूयः प्रजायते । स्याद्यन्तकालयोर्मध्यः कालो ज्ञेयोऽति-दारुणः । प्रज्वलज्ज्वलनाकारः सर्वकर्मसु गर्हितः । एकायनगतं यावदर्केन्द्वोर्मण्डलान्तरम् । सम्भवस्ताव-देवास्य सर्वकर्मविनाशकृत् । व्यतीपातत्रयं घोरं गण्डा-न्तत्रितयं तथा । एतद् भसन्धित्रितयं सर्वकर्मसु वर्जयेत्" २अरिष्टसूचके गोचरविलग्नादिस्थग्रहयोगभेदे च

**दुष्ट(स्त)र** त्रि० दुःखेन तीर्यतेऽसौ कर्मणि खल् वेदे सुषामादेराकृतिगणत्वात् षत्वम् । "अर्कं त्यं मरुतः पत्-सु दुष्टरम्" ऋ०१।५४।१४ लोके तु न षत्वम् "तितीर्षु-र्दुस्तरं मोहादुडुपेनास्मि सागरम्" रघुः ।

**दुष्टरक्तादृक्** त्रि० दुष्टा रक्ता च दृगस्य । पित्तादिदोषजरक्त-नेत्रके । "दीक्षितः स्त्रीप्रसङ्गेन जायते दुष्टरक्तादृक्" शातातपेन तत्कर्मपाक उक्तः ।

**दुष्टरीतु** पु० दुर्+तृ–तुन् वेदे इट् दीर्घश्च षत्वम् । दुःखेन तरणीयेऽहिंस्ये "तुविग्रये वह्नये दुष्टरीतवे" ऋ०२।२१। २। लोके तु दुस्तर्तु इत्येव ।

**दुष्टवृष** पु०कर्म०। शक्तोऽपि धूर्वहे वृषे (गड़िया) ख्याते हेमच०। [शब्दे दृश्यम् ।

**दुष्टव्रण** पु० नित्यक०। दुश्चिकित्स्यनीये व्रणभेदे व्रणीय-

**दुष्टसाक्षिन्** पु० कर्म० । नारदाद्युक्ते असाक्षित्वप्रयोजकदोष